"मूलपत्रं करीराग्रे फलकाण्डाधिरूढकम्। त्वक्पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम्" इत्युक्तेषु ७वृन्ताकादीनां पत्रादिषु न०। तत्र १मूलं मूलकादेः। २पत्रं वास्तूकादेः। ३करीरं वंशादेः। ४अग्रं वेत्रादेः। ५फलं कुष्माण्डादेः। ६काण्डं उत्पलादेः। ७अधिरूढं तालास्थिमज्जादेः। ८त्वक् मातुलाङ्गादेः। ९पुष्पं कोविदारादेः। १०कवकं छत्रिकादेः। भावप्र० अन्ययोक्तं यथा "पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा। शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम्"। "प्रायः शाकानि सर्वाणि विष्टम्भीनि गुरूणि च। रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च। शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रम् वर्णं विनाशयति रक्तमथापि शुक्रम्। प्रज्ञाक्षयं च कुरुते पलितञ्च नूनम् हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः"। ८द्वीपभेदे मत्स्यपु० १२१ अ० तत्प्रमाणाद्युक्तं यथा

"शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयम्। कथ्यमानं निबोधध्वं शाकं द्वीपं द्विजोत्तमाः!। जम्बूद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः। विस्तारात् द्विगुणश्चापि परीणाहः समन्ततः। तेनावृतः समुद्रोऽयं द्वितीयो लवणोदकः। तत्र पुण्या जनपदा चिराच्च म्रियते जनः। कुत एव च दुर्भिक्षं क्षमातेजोयुतेष्विह। तत्रापि पर्वताः शुभ्राः सप्तैव मणिभूषिताः। शाकद्वीपादिषु त्वेषु सप्त सप्त नगास्त्रिषु। ऋज्वायताः प्रतिदिशं निविष्टाः पर्वतोत्तमाः। रत्नाकराद्रिनामानः सानुमन्तो महाचिताः। समोदिताः प्रतिदिशं द्वीपविस्तारमानतः। उभयत्रावगाढौ च लवणक्षीरसागरौ। शाकद्वीपे तु वक्ष्यामि सप्त दिव्यान् महाचलान्। देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते। प्रागायतः स सौवर्ण उदयो नाम पर्वतः। तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्त्यपयान्ति च। तस्यापरेण सुमहान् जलधारो महागिरिः। स वै चन्द्रः समाख्यातः सर्वौषधिसमन्वितः। तस्मान्नित्यमुपादत्ते वासवः परमञ्जलम्। नारदो नाम चैवोक्तो दुर्गशैलो महाचितः। तत्राचलौ समुत्पन्नौ पूर्वं नारदपर्वतौ। तस्यापरेण सुमहान् श्यामो नाम महागिरिः। यत्र श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः किल। स एव दुन्दुभिर्नाम श्यामपर्वतसन्निभः। शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः। रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्। तस्यापरेण रजतो महानस्तोगिरिः स्मृतः। स वै सोमक इत्युक्तो देवैर्यत्रामृतं पुरा। सम्भृतञ्चाहृतञ्चैव मातुरर्थे गरुत्मता। तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः। हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः। आम्बिकेयात् परो रम्यः सर्वौषधिनिषेवितः। विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः। यस्माद्विभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः। सैवेह केशवेत्युक्तो यतो वायुः प्रवाति च। तेषां वर्षाणि वक्ष्यामि पर्वतानां द्विजोत्तमाः। शृणुध्वं नामतस्तानि यथावदनुपूर्वशः। द्विनामान्येव वर्षाणि यथैव गिरयस्तथा। उदयस्योदयं वर्षं जलधारेति विश्रुतम्। नाम्ना गतभयं नाम वर्षं तत् प्रथमं स्मृतम्। द्वितीयं जलधारस्य सुकुमारमिति स्मृतम्। तदेव शैशिरं नाम वर्षं तत् परिकीर्त्तितम्। नारदस्य च कौमारन्तदेव च सुखोदयम्। श्यामपर्वतवर्षं तदनीचकमिति स्मृतम्। आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभम्। सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्करम्। तदेवासितमित्युक्तं वर्षं सोमकसंज्ञितम्। आम्बिकेयस्य मैनाकं क्षेमकञ्चैव तत् स्मृतम्। तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितम्। द्वीपस्य परिणाहञ्च ह्रस्वदीर्घत्वमेव च। जम्बूद्वीपेन संख्यातं तस्य मध्ये वनस्पतिम्। शाको नाम महावृक्षः प्रजास्तस्य महानुगाः। एतेषु देवगन्धर्वाः सिद्धाश्च सह चारणैः। विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह। तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः। तेषु नद्यश्च सप्तैव प्रतिवर्षं समुद्रगाः। द्विनाम्ना चैव ताः सर्वा गङ्गा सप्तविधा स्मृता। प्रथमा सुकुमारीति गङ्गा शिवजला शुभा। मुनितप्ता च नाम्नैषा नदी सम्परिकीर्त्तिता। सुकुमारी तपःसिद्धा द्वितीया नामतः सती। नन्दा च पावनी चैव तृतीया परिकीर्त्तिता। शिविका च चतुर्थी स्यात् द्विविधा च पुनः स्मृता। इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः कुहूः। वेणुका चामृता चैव षष्ठी सम्परिकीर्त्तिता। सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता। एताः सप्त महाभागाः! प्रतिवर्षं शिवोदकाः। भावयन्ति जनं सर्वं शाकद्वीपनिवासिनम्। अभिगच्छन्ति ताश्चान्या नदनद्यः सरांसि च। बहूदकपरिस्रावा यतो वर्षति वासवः। तासान्तु नामधेयानि परिमाणं तथैव च। न शक्यं परिसंख्यातुं पुण्यास्ताः सरिदुत्तमाः। ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते।